শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রী ফণীন্দ্রক্ষ্মাভৃতস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী ফণীন্দ্রক্ষ্মাভৃতস্তোত্রম্ ॥

অস্তি শ্রীমানৱনিতিলকো ৱেঙ্কটো নাম শৈলো
ভূযানেকো ভুৱি পরিণতঃ পুণ্যরাশিঃ প্রজানাম্।
সারোদ্ধারসসকলজগতাং স্থাপিতঃ ক্বাপি ধাত্রা
যস্মিন্ সাক্ষাতপরমপুরুষো দীৱ্যতি শ্রীসহাযঃ॥ ১ ॥

সৌৱর্ণাত্মা মরতকমযৈর্ৱজ্রৱৈডূর্যরূপৈঃ
নীলোতকীর্ণৈঃ স্ফটিকঘটিতৈঃ পদ্মরাগপ্রণীতৈঃ।
নানারত্নাকৃতিভিরখিলৈসসানুভিসসম্ভৃতশ্রীঃ
সর্ৱৈসসোযং সুরগিরিরিতি প্রত্যভিজ্ঞাযতে যঃ॥ ২ ॥

উর্ৱীগুর্ৱী মুদধিৱসনামুদ্বহন্ ভূললগ্নাম
উত্তুঙ্গাগ্রৈরুপরিশিখরৈরুল্লিখন্নূর্ধ্বসীমাম্।
তির্যগদিৱ্যাকৃতিমহিমতশ্ছাদযন্ যো দিগন্তান
ৱিষ্ণুসসাক্ষাদযমিতি জনৈস্তর্ক্যতে ভূৱরাহঃ॥ ৩ ॥

মন্দস্পন্দানিলৱিৱলিতাতাম্রবালপ্রৱাল-
স্বৈরাস্বাদপ্রমদৱিহরতকোকিলালাপগর্ভৈঃ।
সান্দ্রচ্ছাযৈসসরসকুসুমৈসসৌরভাকৃষ্টভৃঙ্গৈঃ
সর্ৱৈর্ৱৃক্ষৈসসততফলিতৈর্যঃ সদা সম্ভৃতশ্রীঃ॥ ৪ ॥

স্বৈঃ পাদ্যার্ঘ্যপ্রভৃতি দদতঃ স্যন্দমানৈর্মরন্দৈঃ
ভৱ্যামোদৈঃ পৱনগলিতৈরর্চযন্তঃ প্রসূনৈঃ।
ৱৃন্তোদ্বান্তৈঃ পরিণতফলৈর্নিত্যক্লৃপ্তোপহারাঃ
ধন্যা ৱৃক্ষা যদুপরি রমাৱা সমারাধযন্তি॥ ৫ ॥

পুণ্যামোদপ্রসৱলহরীৱাসিতাশাৱকাশৈঃ
দূরে দূরে দুরিতশমনৈঃ পশ্যতাং প্রাণভাজাম্।
শ্রীমন্নারাযণৱরশিরোভূষণীভাৱভৱ্যৈঃ
স্নিগ্ধৈঃ কৃষ্ণৈস্তরুণতুলসীকাননৈঃ পাৱনো যঃ॥ ৬ ॥

www.prapatti.com

নিত্যাশুষ্যতসলিলসরসীস্যন্দসন্ধুক্ষিতানাং
শ্রাৱংশ্রাৱং শ্রৱণসুভগং নিস্বনং নির্ঝরাণাম্।
ধত্তে ধারাধররৱধিযা নৃত্যতো নীলকণ্ঠান
কেকাকণ্ঠান্নিজসহচরীনিত্যনেত্রোতসৱান্ যঃ॥ ৭ ॥

দংশং দংশং কুশনৱদলৈর্দর্ভৈর্দূর্ৱাপ্রৱালান
খাদঙ্খাদং পৃথুমৃদুফলং ভূরুহাং ভূৱিকীর্ণম্।
পাযংপাযং যদুপরি পযঃ পাৱনং দীর্ঘিকাণাং
মাদংমাদং ৱিহরতি মৃগীযূথপঃ কৃষ্ণসারঃ॥ ৮ ॥

ধীরাঃ সিংহাঃ কুপিতশরভাঃ কুঞ্জরেন্দ্রা মদান্ধাঃ
ঘোরা ৱ্যাঘ্রা কটুককিটযো ভীমভল্লূকসঙ্ঘাঃ।
সর্ৱে চান্যে সহজরিপৱো জন্তৱো যত্রৱাসাঃ
সঙ্গাহন্তে প্রশমিতরুষঃ স্বৈরমেকোদপানে॥ ৯ ॥

শ্রীমদ্বাদিপ্রৱরভযকৃদ্দেশিকোক্তং ফণীন্দ্র-
ক্ষ্মাভৃতস্তোত্রং ভুৱনমহিতং শব্দতোর্থাচ্চ সাধু।
শ্রুত্বা প্রীতা ভৱতু জনতা কাৱ্যনাট্যাদিদক্ষাঃ
নৈতত্তুল্যং ভৱতি ভৱতি স্মাপি যাৱদ্ধরিত্র্যাম্॥ ১০ ॥

॥ ইতি শ্রী ফণীন্দ্রক্ষ্মাভৃতস্তোত্রং সমাপ্তম্ ॥